यवकः, पुं, (यवप्रकारः। यव+"स्थूलादिभ्यः प्रकारवचने कन्।"५।४।३। इति कन्।) यवः। इत्यमरटीकायां रामाश्रमः॥ (यथा,—

"यवका हायनाः पांशुवाप्यनैषधकादयः।
शालीनां शालयः कुर्व्वन्त्यनुकारं गुणा गुणैः॥"
इति चरके सूत्रस्थाने २७ अध्याये॥)

यवक्यं, त्रि, (यवकानां भवनं क्षेत्रमिति। यवक+"यवयवकषष्टिकाद् यत्।" ५।२।३। इति यत्।) यवभवनोचितक्षेत्रम्। इत्यमरः।२।९।७॥

यवक्षारः, पुं, (यवजातः क्षारः। शाकपार्थिववत् समासः।) क्षारविशेषः। यथा,—

"नरसारयवक्षारस्फटिकारित एव काचवकयन्त्रैः।
बहुशः पाक्यं सत्त्वं तहि महाद्रावकनाम॥"
इति रत्नावली॥

तत्पर्य्यायः। यवाग्रजः २ पाक्यम् ३। इत्यमरः। २।९।१०८॥ यवशाषः ४ यवशूकः ५ सारकः ६ रेचकः ७ यवनालकः ८। इति शब्दरत्नावली॥ यावशूकः ९ क्षारः १० तर्ज्जः ११ तीक्ष्णरसः १२ यवनालजः १३ इति रत्नमाला॥ यवजः १४ यवशूकजः १५ यवाह्वः १६ यवापत्यम् १७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवातोदरार्त्तिनाशित्वम्। आमशूलाश्मरुक्मूत्रकृच्छ्रविषदोषहरत्वम्। सरत्वञ्च। इति राजनिर्घण्टः॥ अर्शःश्वासगुल्मग्रहणीपाण्डुशोथानाहगलामयनाशित्वञ्च। इति राजवल्लभः॥ (तथा च।

"पाक्यः क्षारो यवक्षारो यवशूको यवाग्रजः।
यवक्षारो लघुः स्निग्धः सुसूक्ष्मो वह्निदीपनः॥
निहन्ति शूलवातामश्लेष्मश्वासगलामयान्।
पाण्डुशोथग्रहणीगुल्मानाहप्लीहहृदामयान्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

यवक्षोदः, पुं, (यवानां क्षोदः।) यवचूर्णम्। तत्पर्य्यायः। चिक्कसः २। इति हेमचन्द्रः॥

यवगण्डः, पुं, (यूनो गण्डः स्फोटकः। पृषोदरादित्वात् यवादेशः।) युवगण्डः। इति शब्दरत्नावली॥ वयस्फोड़ा इति भाषा॥

यवजः, पुं, (यवाज्जायते इति। जन्+डः।) यवक्षारः। इति रत्नमाला। (यथास्य पर्य्यायः।

"यावशूको यवक्षारो यवशूको यवाग्रजः।
क्षारस्तीक्ष्णस्तीक्ष्णरसो यवजो यवनालजः॥"
इति वैद्यकरत्नमालायाम्॥)

यवानी। इति राजनिर्घण्टः॥

यवजोद्भवं, क्ली, (यवजादुद्भवोऽस्य।) तवक्षीरम्। इति राजनिर्घण्टः॥

यवतिक्ता, स्त्री, लताप्रभेदः। शङ्खिनीति यवेची इति च ख्याता। (यथा, सुश्रुते सूत्रस्थाने ४५ अः।

"यवतिक्तातैलं सर्व्वदोषप्रशमनमीषत्तिक्तम्।
अग्निदीपनं लेखनं मेध्यं पथ्यं रसायनञ्च॥")

तत्पर्य्यायः। महातिक्ता २ हड़पादविसर्पिणी ३ नाकुली ४ नेत्रमीना ५ शङ्खिनी ६ पत्रतण्डुली ७ तण्डुली ८ अक्षपीड़ा ९ सूक्ष्मपुष्पी १० यशस्विनी ११ माहेश्वरी १२ तिक्तफला १३ यावी १४ तिक्ता १५। अस्या गुणाः। सतिक्तात्वम्। दीपनत्वम्। रुचिकारित्वम्। क्रिमिकुष्ठविवर्ण्णसदोषनाशित्वम्। रेचनत्वञ्च। इति राजनिर्घण्टः॥

यवतैलं, क्ली, (यवनिर्म्मितं तैलम्।) यवचूर्णादियुक्तपक्वतैलविशेषः। तत्प्रकारं गुणश्चाह।

"यवचूर्णार्द्धकुड़वं मञ्जिष्ठार्द्धपलेन तु।
तैलप्रस्थः शतगुणे काञ्जिके साधितो जयेत्।
ज्वरं दाहं महावेगमङ्गानाञ्च प्रहर्षणम्॥"
इति सुखबोधः॥

यवद्वीपः, पुं, (यवनामा द्वीपः इति मध्यपदलोपिकर्म्मधारयः।) उपद्वीपविशेषः। यावा इति भाषा। यथा,—

"यत्नवन्तो यवद्वीपं सप्तराज्योपशोभितम्।
सुवर्णरूप्यकं द्वीपं सुवर्णकरमण्डितम्॥"

इति वाल्मीकीये रामायणे किष्किन्धाकाण्डे ४० सर्गः॥*॥ "अतः परं यत्नवन्तो भूत्वा सप्तराज्योपशोभितं यवद्वीपं तथा सुवर्णद्वीपं विचेतव्यमिति शेषः। सुवर्णकरमण्डितमिति सुवर्णं कुर्व्वन्ति ये तैः शोभितम्।" इति रामायणतिलकनामतट्टीका॥

यवनः, पुं, देशविशेषः। (यथा, मात्स्ये। १२०।४३।

"तान् देशान् प्लावयन्ति स्म म्लेच्छप्रायांश्च सर्व्वशः।
सशैलान् कुकुरान् रौधान् वर्व्वरान् यवनान् खसान्॥")

वेगः। वेगाधिकाश्वः। इति मेदिनी॥ गोधूमः। गर्ज्जरत्वम्। तुरुष्कः। इति राजनिर्घण्टः॥ (यौति मिश्रीभवतीति। यु+"युयुरुच्णो युच्।" उणा० २।७४। इति युच्।) जातिविशेषः। इति शब्दरत्नावली॥ स तु यवनदेशोद्भवययातिराजपुत्त्रतुर्व्वसुवंशः। यथा,—

"यदोस्तु जाता यदवस्तुर्व्वसोर्यवनाः सुताः।
द्रुह्योस्तु तनया भोजा अनोस्तु म्लेच्छजातयः।
पूरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव!॥"
इति मात्स्ये ३४ अध्यायः॥*॥

सगरराजेनैषां सर्व्वशिरोमुण्डनं सर्व्वधर्म्मराहित्यञ्च कृतं ते चातुर्व्वर्ण्यपरित्यागात् म्लेच्छत्वं ययुरिति विष्णुपुराणोक्तत्वात् यवनः मोसलमानेङ्गरेजोभयजातिवाचकः। यवनशब्दश्चवर्गतृतीयादिरिति रघुनन्दनभट्टाचार्य्येण लिखितम्॥ जवनादीनान्तु सर्व्वधर्म्मराहित्यमुक्तं हरिवंशे। यथा,—

"सगरस्तां प्रतिज्ञाञ्च गुरोर्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत्।
जवनानां शिरः सर्व्वं काम्बोजानान्तथैव च॥
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः।
निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना॥
शका जवनकाम्बोजाः पारदाः पह्लवास्तथा।
कोलिसर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः॥
वशिष्ठवचनाद्राजन्! सगरेण महात्मना।

शकानां शकदेशोद्भवानां क्षत्त्रियाणां एवं जवनादीनामिति। अत्र जवनशब्दस्तद्देशोद्भववाची चवर्गतृतीयादिः। जवनो देशवेगिनोरिति त्रिकाण्डशेषाभिधानदर्शनात्। तेषां म्लेच्छत्वमप्युक्तं विष्णुपुराणे। तथा एतान् जवनादीनुपक्रम्य। ते चातुर्धर्म्मपरित्यागात् म्लेच्छत्वं ययुरिति। बौधायनः।

"गोमांसखादको यश्च विरुद्धं बहु भाषते।
धर्म्माचारविहीनश्च म्लेच्छ इत्यभिधीयते॥"
इति प्रायश्चित्ततत्त्वम्॥*॥

यवनादीनां राज्यकालो यथा,—

"सप्त गर्द्दभिनश्चापि शकाश्चाष्टादश स्मृताः।
यवनाष्टौ भविष्यन्ति तुषारश्च भविष्यति॥
अष्टौ ते यवना राज्यं वर्षाणां परिसङ्ख्यया।
भोक्ष्यन्त्यशीति तद्वच्च येऽपि गर्द्दभिनः स्मृताः॥
शतानि त्रीणि वर्षाणां द्वाशीतीनि शतानि वै।
शकानां राज्यकालः स्यात्तद्विद्धि निश्चयो गतः॥
शतस्यार्द्धं चतुर्याणि वर्षाणां राज्यभागिनः।
मरुत्तानां सुताः काला अस्मिन् भोक्ष्यन्ति ते महीम्॥
मरुत्ता इवलैः साद्धं तथान्ये म्लेच्छसम्भवाः।
भोक्ष्यन्ति राज्यं प्राचेषु भविष्ये तद्विधारितम्॥
शतानि त्रीणि वर्षाणां मौण्ड्रा राज्यभुजः स्मृताः।
अत्यन्ति पार्व्वतेयास्तु द्वे शते परिसङ्ख्यया॥
शताद्धमश्च तथा राज्यं भोक्ष्यन्ति ते नृपाः।
सप्तषष्टिस्तु वर्षाणि दशातीयाहृताः स्मृताः॥
तेषु च्छन्नेषु कालेषु ततः किलकिला नराः।
भविष्यन्तीह यवना धर्म्मतः कामतोऽर्थतः॥
तैर्विमिश्रा जनपदा आर्य्या म्लेच्छाश्च सर्व्वशः।
विपर्य्ययेण वर्त्तन्ते जनयिष्यन्ति वै प्रजाः॥
लुब्धानृतरताश्चैव भवितारस्तदा नृपाः।
तेषां व्यतीते पर्य्याये बहुवर्षयुगैस्तदा॥
राजानः संप्रणश्यन्ति कालेन महता ततः।
कल्किना ताड़िताः सर्व्वे आर्य्या म्लेच्छाश्च सर्व्वशः॥
अधार्म्मिकाश्च ये सर्व्वे पाषण्डाश्चैव सर्व्वशः।
दुष्टे नृपतिशब्दे वै सन्ध्यांशिष्टे च वै कलौ॥"
इति ब्रह्माण्डपुराणे ३६ अध्यायः॥

मुनिविशेषः। यथा,—

"जातं दिनं दूषयते वशिष्ठ-
श्चाष्टौ च गर्गो यवनो दशाहम्।
जन्माख्यमासं किल भागुरिश्च
व्रते विवाहे क्षुरकर्म्मणि॥"
इति तिथ्यादितत्त्वम्॥*॥

कालयवनोत्पत्तिर्यथा,—

श्रीपराशर उवाच।

"गार्ग्यं गोष्ठे द्विजं श्यालः षण्ढ इत्युक्तवान् द्विज।
यदूनां सन्निधौ सर्व्वे जहसुर्यादवास्ततः॥
ततः कोपसमाविष्टो दक्षिणापथमेत्य सः।
सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहम्॥